**प्रेरक** त्रि॰ प्र+ईर–ण्वुल्। प्रयोजके प्रवृत्त्यनुकूलव्यापारसाधके।

**प्रेरण** न॰ प्र+ईर–णिच्–ल्युट्। प्रेषणे निकृष्टस्य भृत्यादेः कार्य्यादौ नियोगे। णिच्–युच्। प्रेरणाप्यत्र स्त्री।

**प्रेर्वन्** पु॰ प्र+ईर–वनिप् तुट् च। १सागरे २नद्यां स्त्री ङीप् वनोर च। प्रेर्त्वरी उज्ज्वलद॰।

**प्रेष** गतौ भ्वा॰पर॰ सक॰ सेट्। प्रेषति अप्रेषीत्। ऋदित् चङि न ह्रस्वः। अपिप्रेषत् त।

**प्रे(प्रै)ष** पु॰ प्र+इष–घञ् वृद्धिः ईष–वा घञ् गुणः। १प्रेषणे २पीडने च जटा॰।

**प्रेषण** न॰ प्र+इष–ल्युट्। प्रेरणे नियोगे। णिच्–युच्। प्रेषणाऽप्यत्र स्त्री। प्रेषणेन जीवति वेतना॰ ठक्। प्रैषणिक तदुपजीविनि त्रि॰। प्रेषणं नित्यमर्हति छेदा॰ ठक्। प्रैषणिक नित्यप्रेषणार्हे त्रि॰।

**प्रेष्ठ** त्रि॰अतिशयेन प्रियः प्रिय+इष्ठन् प्रादेशः एकाच्कत्वात् न टिलोपः। १प्रियतमे अमरः। स्त्रियां टाप्। सा च २प्रियतमायां ३जङ्घायाञ्च शब्दच॰।

**प्रे(प्रै)ष्य** त्रि॰प्र+इष–कर्मणि ण्यत् वृद्धिः ईष–वा ण्यत् गुणः। १प्रेरणीये नियोज्ये २दासे अमरः। भावे यत्। ३प्रेरणे न॰ तत्करोति कृ–ट। प्रेष्यकर नियोगकारके "यन्तुः पुष्यकराह्वयः" भा॰द्रो॰ २३अ॰।

**प्रेहिकटा** स्त्री प्रेहि कट इत्युच्यते यस्यां क्रियायाम् मयू॰ स॰। कटसम्बोधनक प्रगमनार्थक्रियानियोगे।

**प्रेहिकर्दमा** स्त्री प्रेहिकर्दम इत्युच्यते यस्यां क्रियायाम् मयू॰स॰। कर्दमसम्बोधनकप्रगमननियोगे। एवं प्रेहि-द्वितीया प्रेहिवाणिजा एतावपि शब्दौ मयू॰ समा॰। द्वितयवाणिजसम्बोधनकप्रगमननियोगक्रिययोः। [स्त्री॰]

**प्रैय** न॰ प्रियस्य भावः पृथ्व्या॰ इमनिचोऽभावे अण्। प्रियत्वे

**प्रैयव्रत** त्रि॰ प्रियव्रतस्येदम् अण्। प्रियव्रतसम्बन्धिनि वैवस्वतमनोः पुत्रभेदे अपत्ये तु इञ् प्रैयव्रति तत्रार्थे पु॰।

**प्रैष** पु॰ प्र+इष घञ् वा पररूपाभावः। १क्लेशे २मर्दने ३उन्मादे ४प्रेरणे च मेदि॰।

**प्रोक्त** न॰ प्र+वच–गौणे कर्मणि, तस्याविवक्षायां मुख्ये वा कर्मणि क्त। १कथिते यं प्रति किञ्चित् वस्तु कथ्यते तस्मिन् २यथेन्मुख्यकर्मणि पदार्थे च।

**प्रोक्षण** न॰ प्र+उक्ष–भावे ल्युट्। १यज्ञार्थे पशुहनने अमरः। २वधे ३सेचने च मेदि॰। ४उत्तानहस्तेन जलादेः सेचने अभ्युक्षणशब्दे २१३पृ॰ दृश्यम्। प्रोक्ष्यतेऽनया करणे ल्युट् ङीप्। ५प्रोक्षणसाधनेषु अप्सु स्त्री "अग्रतुरे प्रोक्षणीर्निधाय" कात्या॰ श्रौ॰ २।२४॰ "याभिरद्भिर्हविषः पुरोडाशानाञ्च प्रोक्षणं कृतं ताः प्रोक्षण्यः" कर्कः। उपचारात् ७तदाधारपात्रभेदे च स्त्री।

**प्रोक्षित** त्रि॰ प्र+उक्ष–कर्मणि क्त। १सिक्ते २निहते मेदि॰ यज्ञार्थं संस्कृते ३पश्वादौ च "भक्षयेत् प्रोक्षितं मांसम्" इति स्मृतिः "आरण्याः सर्वदैवत्याः प्रोक्षिताः सर्वशो मृगाः। अगस्त्येन पुरा राजन्! मृगया येन पूज्यते" ति॰त॰।

**प्रोज्जासन** न॰ प्र+उद्+जस–णिच्–ल्युट्। मारणे हेमच॰

**प्रोञ्छन** न॰ प्र+उञ्छ–ल्युट्। मार्जने (पोँछा)।

**प्रोज्झित** त्रि॰ प्र+उज्झ–कर्मणि क्त। प्रकर्षेण त्यक्ते "धर्मः प्रोज्झितकैतवोऽत्र" भाग॰१।१।२ श्लो॰ "अत्र प्रशब्देन मोक्षाभिसन्धिरपि निरासितः" श्रीधरः।

**प्रो(प्रौ)ढ** त्रि॰ प्र+वह–क्त वा वृद्धिः। १वृद्धे अमरः २प्रगल्भे हेमच॰ ३निपुणे राजनि॰। ४प्रकर्षेण ऊढे च। स्त्रियां टाप्। सा च ५नायिकाभेदे नायिकाशब्दे ४०४२ पृ॰ दृश्यम्। "त्रिंशद्वर्षादूर्ध्वं पञ्च पञ्चाशद्वर्षपर्यन्तं प्रौढावस्था यथा "आ षोडशात् भवेद्बाला तरुणी त्रिंशता मता। पञ्चपञ्चाशता प्रौढा भवेद्वृद्धा ततःपरम्"। अस्या वश्यत्वकारणं यथा "अलङ्कारादिभिर्बाला तरुणी रतियोगतः। प्रेमदानादिभिः प्रौढा वृद्धा च दृढताडनात्"। तस्या रमणे दोषो यथा "बाला तु प्राणदा प्रोक्ता तरुणी प्राणहारिणी। प्रौढा करोति वृद्धत्वं वृद्धा मरणदा भवेत्" रतिम॰। चत्वारिंशद्वर्षयुक्ते पुंसि "षोडशाब्दो युवा प्रौढश्चत्वारिंशद्भिरब्दकैः" तन्त्रसा॰। "अर्थवद्ग्रहणेनार्थकस्येति" परिभाषया ऊढेः पृथगुपादानाद्वा क्त वति न वृद्धिः किन्तु यथाह तत्र प्रोढवान् इत्येव।

**प्रो(प्रौ)ढपाद** त्रि॰प्रौढः पादो यस्य। आसनारोपितपादादिके "आसनारूढपादस्तु जानुनोर्जङ्घयोस्तथा। कृतावसक्थिको यस्तु प्रौढपादः स उच्यते। स्नानमाचमनं होमं भोजनं देवतार्चनम्। प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणम्" इति छन्दोगप॰। "अनेकदारुदार्वाशले भूमिसमे इष्टकासु संकीर्णीभूता" इति बौधायनवचनात्तथाविधे आरूढपादोऽपि न कुर्यात्" आ॰त॰।

**प्रो(प्रौ)ढि** स्त्री प्र+वह–क्तिन् वा वृद्धिः। १सामर्थ्ये २सामर्थ्यहेतुके क्रियासु योग्यताध्यवसाये ३उक्तौ च प्रौढिवादः।

**प्रोथ** पु॰ प्र+अठि–गतौ अच् पृषो॰। पतद्ग्रहे हारा॰।